


Bodleian Libraries

UNIVERSITY OF OXFORD

This book is part of the collection held by the Bodleian Libraries and scanned by Google, Inc. for the Google Books Library Project.


For more information see:

http://www.bodleian.ox.ac.uk/dbooks



This work is licensed under a Creative Commons Attribution-NonCommercial-ShareAlike 2.0 UK: England & Wales (CC BY-NC-SA 2.0) licence.

Sarsk
S. 178 a



Sanskr. 5. 178

THE SANSKRIT READER.

संस्कृतपाठावलिः।

Vol I. January 1884. No 1.

CONTENTS.

		PAGE.
Part I.	EXERCISES.	
Section 1.	Exercise 1.	1
„	2. „ 1.	1
„	3. „ 1.	1
Part II.	CHOICE EXPRESSIONS, IDIOMS &c...	1
Part III.	TALES FROM SANSKRIT AUTHORS.	
	1. S'rîharsha's Ratnâvalî.	1
Part IV.	ELEGANT EXTRACTS.	
	1. The Himâlaya.	1
	2. A Moon-light Night...	4

BOMBAY:

PRINTED AND PUBLISHED BY THE PROPRIETOR OF THE "NIRNAYA-SÂGARA" PRESS.

THE SANSKRIT READER.

ARRANGEMENT.

This Magazine will contain, for the present, 16 pages. It will be divided into four parts. Part I will contain Sections 1–3 adapted for Anglo-Vernacular Standards IV–VI respectively. This part will contain easy exercises for translation. Care will be taken to see that these exercises contain words and expressions with which the student is familiar in Prof. Bhâṇdârkar's Books, but when any new words or forms occur explanatory foot-notes will be given. Part II is meant for Students of Standard VI. and VII. It will include a collection of choice words, expressions, and idioms from various Sanskrit writers, with their English equivalents. Part III is intended for the Candidate Classes in our High Schools. Here it is proposed to give abstracts of the Standard Sanskrit Kâvyas, Nâtakas, Kathâs &c. on the plan of the well-known "Lamb's Tales from Shakespeare". Part IV is expected to serve as reading for more advanced Students. It will contain elegant extracts from original Sanskrit works with full explanatory Notes in English. Thus, it is hoped, that this serial will be useful to those for whom it is intended and will be read as a companion to Prof. Bhâṇdârkar's Books. The parts and sections are so graduated as to meet, it is hoped, the requirements of all classes of Students—from beginners to under-graduates. It is also hoped that it will afford interesting reading to those who do not read with an eye for examination.

Each number will be issued on the first of every month. Each part and section will have separate paging so that they could be bound separately.

NOTICE TO CORRESPONDENTS.

We have received several communications from kind friends suggesting improvement both in the manner and matter of the Sanskrit Reader. The suggestions are welcome, but sufficient time must elapse before we can judge which of them are absolutely needed. In the meanwhile we shall be happy to receive more suggestions.

THE SANSKRIT READER.

OPINIONS.

"The new Sanskrit Reader is in my opinion a very meritorious publication, and is calculated, I think, to materially help the large and increasing class of students, learning the Sanskrit language. The various parts of the Reader are put together with great judgment and with due regard to the wants of the various classes of students for whom they are intended. The adaptation of sentences from standard works is also well done and the notes, so far as I have seen them, are judicious. I am afraid there will be considerable difficulty in making the last Part complete in each number, but if that could be done, it would make the publication, I think, even more acceptable than it is at present. I have noticed a few trifling slips but they do not detract from the merits of the publication as a whole and can be easily corrected".— *K. T. Telang.*

"A good help to the beginners of Sanskrit."— *G. W. Kurkaray, Registrar of Native Publications (in the Bombay Government Gazette of 14th May 1884).*

विक्रीस तयार.

छत्रपति संभाजी महाराज.

अथवा.

राजाचें दुष्कर्म राजाला भोंवतें आणि प्रजेलाही भोंवतें.

नागेशराव विनायक बापटकृत.

(किंमत १। रुपया. पोष्टेज २ आणे.)

हें पुस्तक " निर्णयसागर " छापखान्यांत विकत मिळेल.

Exercise 7.

पुत्राद्भयं नास्ति । **पुत्राभ्यां** द्रव्यं लभ्यते । **पुत्रेभ्यः** सुखमधिगच्छति जनः ।

मेघाद्वारि पतति । **मेघाभ्यां** न [1]गलत्युदकम् । **मेघेभ्यः** [3]प्रतिध्वनिः श्रूयते ।

वृक्षाद्दलति पर्णम् । **वृक्षाभ्यां** छिद्यन्ते शाखाः । **वृक्षेभ्यः** फलानि पतन्ति ।

समुद्रात्फेनं आनीयते । **समुद्राभ्यां** [5]मत्स्यानानयसि । **समुद्रेभ्यो** नगराणि दूराणि ।

हस्तात्पतन्ति पुस्तकानि । **हस्ताभ्यां** गलन्ति [6]पुष्पभाजनानि । **हस्तेभ्यो** निवार्यन्ते [8]दंशाः ।

ग्रामादागच्छसि । **ग्रामाभ्यां** किंकरौ गच्छतः । **ग्रामेभ्यो** निर्गच्छन्ति [9]सारमेयाः ।

प्रज्ञादुपदेशं लभन्ते । **प्रज्ञाभ्यामुपदेशं** विन्दते । **प्रज्ञेभ्यस्तं**[10]त्त्वज्ञानं [11]प्राप्यते ।

वेदाद्धर्मः प्रभवति । **वेदाभ्यां** तत्त्वं ज्ञायते । **वेदेभ्य** आचाराः प्रवर्तन्ते ।

अरण्यात्किकरः प्रतिनिवर्तते । **अरण्याभ्यां** को[12]लाहलो निर्याति । **अरण्येभ्यो** [13]महिषा निर्गच्छन्ति ।

---

1. To drop. 2. n. Water. 3. Echo. 4. Foam. 5 Fish. 6. Pot, vessel, basket to hold flowers. 7. Are driven. 8. Flies. 9. Dogs. 10. Knowledge of reality. 11. Pass. Pres. of आप् with प्र, 'to get'. 12. A clamour, noise. 13. Buffalo.

गिरेर्नदा उद्भवन्ति । गिरिभ्यां [1]शकटा आगच्छन्ति । गिरिभ्य [2]इन्धनानि [3]वनेचरा आनयन्ति ।

नृपतेर्भयं विद्यते । नृपतिभ्यां [4]भागधेयो नानीयते । नृपतिभ्यः पारितोषिकान्पण्डिता अधिगच्छन्ति ।

व्याधेः क्लेशो भवति । व्याधिभ्यां शरीरं [5]कृशं जायते । व्याधिभ्य [6]उद्भूताः क्लेशा नश्यन्ति ।

तृणात्संजायते क्षीरम् [7] । तृणाभ्यां सुखमनुभवतो [8]बलीवर्दौ । तृणेभ्यः शरीराणि पुष्यन्ति ।

रथादवतरामि । रथाभ्यामवतरतः सारथी । रथेभ्यः पतन्ति [9]ध्वजाः ।

आसनादुत्तिष्ठति । आसनाभ्यां प्रवहति जलम् । आसनेभ्यः पुस्तकान्याहरन्ति [10]छात्राः ।

Synonyms of भृत्य.

[11]भृत्ये दासेरदासेयदासगोप्यकचेटकाः ।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥

भृत्य, दासेर, दासेय, दास, गोप्यक, चेटक (or चेट) नियोज्य, किंकर, प्रैष्य, भुजिष्य, परिचारक—सर्वेऽकारान्ताः.

---

1. Cart. 2. Wood, fuel. 3. Foresters. 4. Tribute, tax. 5. Thin, lean, emaciated. 6. Arisen. Past part. of भू with उत्. The Past part. termination in Sanskrit is त. 7. Milk. 8. Bullocks. 9. Flags. 10. Pupils. 11. The same words with the fem. affixes added on are used in the sense of maid-servants.

Exercise 7.

भोः कुमार, गृहाणेममुदञ्चनं कूपं च व्रज। तत्र मम याता नन्दा च वर्तेते। ताभ्यां तं दत्त्वा लघ्वायाहि।

महाभाग, न मां सतीमधिक्षेप्तुमर्हसि। अहं तव न्यायोढा सहधर्मचारिणी।

केचिच्चौराः कस्यचिद्धनिकस्य गृहे चौर्यं कृत्वा स्तेयलब्धं धनमादाय निष्क्रामन्तो रक्षिभिर्दृष्टाः। ततः प्राणत्राणपरायणा निग्रहभिया द्रुतगत्याधावन्। गोरुतान्तरमतिक्रम्य च गृहारामवृक्षान्तर्हिता बभूवुः।

स तं द्रष्टुं गतो प्रतीहारीनिवेदितागमनस्तेन प्रवेशितश्च सभास्थितं तमालोक्य प्रतिहतदृष्टिर्बभूव। तत्तेजसा च वारितप्रसरोऽभवत्।

ऊर्णा कार्पासः कौशेयं च वस्त्रनिर्माण उपयुज्यन्ते। तत्रोर्णा मेषादिभ्यो लभ्यते। कार्पासो वृक्षाल्लभ्यते। कौशेयं तु कृमिजम्। ऊर्णादीनां तन्तवो वेम्ना कौलिकैरूयन्ते।

अहं मातुलेन स्वगृहमाहूतः। तत्र च मे मातामहो मातामही च मे चिराय दर्शनेनातीव हृष्टौ स्याताम्। मम मातुलानी च मया नैव दृष्टा। सापि दृष्टा भवेत्।

---

1. Blame, reproach, insult. 2. Legally wedded. 3. Wife, companion in the practice of religious rites. 4. He whose advance was checked. 5. Silk. 6. Sheep. 7. Insect. 8. Shuttle. 9. Weavers. 10. Are woven. 11. Grand-father (mother's father). The grand-father on the father's side being called पितामह. 12. Wife of maternal uncle, aunt.

किं रे, कुत्रास्ति म उपहस्तिका। कुत्र सा मया निहिता। अत्रैव निहितोतापणे विस्मृतेति न सम्यग्जाने।

ह्य इतश्चेतश्च चरन्तो गता वयं किमप्युद्यानम्। तद्भ्रंसालवृक्षबहुलं दृष्ट्वा सर्वे वयं प्राविशाम। तत्र नूतनप्रकारोऽदृश्यत। सर्वेऽप्याम्रवृक्षाः फलभारैर्नता हस्तलभ्यफलाश्चासन्। उद्यानपालस्यानुज्ञया रसवन्ति कानिचित्फलान्युत्तार्यास्वादामहि। का तेषां माधुरी। पण्यवीथिमानीतानां फलानां नैतादृङ्माधुरी पर्युषितत्वात्।

चैत्रे मासि गृहे गृहे गौर्या उत्सवः क्रियते। सुवासिन्यश्च प्रतिगृहं सविशेषप्रसाधितदेहा उत्सवं प्रत्यक्षीकर्तुं व्रजन्ति। गृहस्वामिन्या हरिद्राकुङ्कुमगन्धमाल्यैश्च सत्क्रियन्ते।

स युवा तां कुमारीं दृष्ट्वा स्निग्धदृष्टिस्तां प्रपच्छ।

ज्येष्ठस्य पौर्णमास्यां तिथौ पतिवत्यः स्त्रियो वटं पूजयन्त्युपवसन्ति च। अस्मिंस्तिथौ पुरा सत्यवतो भार्यया सावित्र्या यमधर्मेण नीयमानः सत्यवान्मोचितः। ततश्चेदं व्रतं भूतले संप्रवृत्तम्। सर्वाश्च भर्तृमत्यः स्त्रिय इदं व्रतमाचरन्ति। अस्य व्रतस्याचरणेन भर्तुर्दीर्घायुस्त्वं संभवतीति मन्यन्ते।

Alliterations, puns &c.

वयोवृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रुताः।
सर्वे ते धनवृद्धस्य द्वारि तिष्ठन्ति किंकराः॥

---

1. Mango. 2. Sweetness. 3. Market, Bazar. 4. Staleness. 5. Women whose husbands are living. 6. Observe a fast. 7. Long-life. 8. Old in years. 9. Old in penance, religious austerity. 10. Old in learning. 11. Loc. Sing. of द्वार् fem.

Exercise 7.

एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका ।
सखीसहस्रसंयुक्ता गुरुपुत्र्या च भा[1]मिनी ॥
देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले ।
व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ॥
ता जलाशयमासाद्य कन्याः कमललोचनाः ।
तीरे न्यस्य दु[2]कूलानि विजह्रुः सिञ्चतीर्मिथः ॥
वीक्ष्य व्रजन्तं गिरिशं सह देव्या वृषस्थितम् ।
सरसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥
शर्मिष्ठाजानती वासो गुरुपुत्र्याः स[3]मव्ययत् ।
स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥
अहो निरीक्ष्यतां ह्यस्या दास्याः कर्म ह्य[4]सांप्रतम् ।
अस्मद्धार्यं धृतवती शुनीव हविरध्व[5]रे ॥
एवं शपन्तीं शर्मिष्ठा गुरुपुत्रीमभाषत ।
रु[6]षा श्वसन्त्युरगीव धर्षिता दं[7]ष्टरदच्छदा ॥
आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि ।
किं न प्रतीक्षसेऽस्माकं गृहान्बा[8]लिभुजो यथा ॥
एवंविधैः सु[9]परुषैः क्षि[10]प्त्वाचार्यसुतां सतीम् ।

---

1. A woman of an irascible temper. 2. Clothes, garments. 3. Wore, dressed herself in. 4. Improper, indecorous. 5. A sacrifice. 6. Instr. Sing. of रुष्. fem. Resentment. 7. दष्ट–bitten biting; रदच्छद–the lid or covering of the teeth i. e. the lip. The whole means biting her lips. 8. Crows. 9. The सु is used here and in many other places to show intensity. Very harsh. 10. Throwing. It is used however here in the sense of 'abusing, scorning' &c.

शर्मिष्ठा प्राक्षिपत्कूपे वास आदाय मैन्युना ॥
तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ।
प्राप्तो यैदृच्छया कूपे जलार्थी तां ददर्श ह ॥
दत्त्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे ।
गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥
तं वीरमाहोशनसी प्रेमनिर्भरया गिरा ।
राजंस्त्वया गृहीतो मे पाणिः परपुरंजय ॥
हस्तग्राहोऽपरो मा भूद्गृहीतायास्त्वया हि मे ।
एष ईशकृतो वीर संबन्धो नौ न पौरुषः ॥
ययातिरनभिप्रेतं दैवोपहृतमात्मनः ।
मनस्तु तद्गतं बुद्ध्वा प्रतिजग्राह तद्वचः ॥

Alliterations, puns &c.

इन्दीवरेण नयनं मुखमम्बुजेन कुन्देन दन्तमधरं नवपल्लवेन ।
अङ्गानि चम्पकदलैः स विधाय वेधाः कान्ते कथं घटितवानुपलेन चेतः ॥

---

1. Anger, exasperation, passion. 2. By accident. 3. Upper garment. 4. Adj. qualifying तस्यै. Without cloth, dress, undressed, naked. 5. The daughter of उशनस्, 'S'ukra'. 6. Match, connection. 7. Made and formed by man. 8. Acceded to &c. 9. A lover bewails the hard-heartedness of his mistress. He attributes the hardness of the heart to the material taken for its formation. He says that the heart is made of stone and he wonders why the creator in creating that lovely form formed the eyes out of lotuses, face out of the same, the teeth out of Kunda flowers &c. and made use of a stone in forming the heart. To form the other limbs and parts of the body he selected the most tender, delicate and soft things in the world and failed to select the same or a similar material for the formation of the heart.

संविधानम्— Preparation.
दिश् with **प्रति** & **आ**— To refuse.
„ **अप**— To pretend.
„ **सम्**— To send word, message.
„ **आ**— To command.
„ **उप**— To teach.
स्वागतम्— Welcome.
प्रावारकः— An upper garment.
जुगुप्सा— Scorn, an object of scorn.
निग्रहानुग्रहौ—**निग्रह**, Punishment ; **अनुग्रह**, Reward. Favour and disfavour.
अधिकरणम्— A magistrate's, judge's court.
दीपिका— A torch.
हालिकः— A tavern keeper.
हृ with **सम्**— To withdraw. As
'न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः'
„ — To abridge. As
'पूर्वशास्त्राणि संहृत्य.'
„ — To collect, bring together. As
'वेणीसंहरणम्.'
औद्धत्य— Insolence, boast.
श्वित्रम्— Leprosy. (कोड).
यथायथम्— According to the circumstances of a (particular) case.
सेर्ष्य— Jealous.
उत्पुलक— With the hair standing on end (as a sign of joy).
श्रोत्रपरंपरा— Succession of ears, from ear to ear. As
'श्रोत्रपरंपरया श्रुतम्.'
बद्धानुशय— One resenting and trying to take vengeance.
अर्थ् with **प्र**— To ask in marriage as a girl. As
'मत्प्रार्थ्यमानाप्यनेन स्वदुहिता वत्सराजस्य दत्ता.'— *Priyadars'ikâ V.*

कथंचित्-यथाकथंचित्-कथमपि— With great difficulty.
निपुणम्— Carefully. As

'निपुणं च विचितमेतन्मया स्थानम्.'

निगड-ल— Shackles, fetters, chains.
विस्तरतः— In detail.
संक्षेपतः-समासतः— In short.
लङ्घ् with उत्— To traverse as a road. As

'महान्तमप्यध्वानं दिवसत्रयेणोल्लङ्घय '— *Priyadarsʹikâ. V.*

अतर्कित— Unexpected, unexpectedly.
वरयोग्या— Of a marriageable age.
उन्निद्र— Open. (Said of a flower, lotus.)
वारुणी— wine, liquor, spirits.
शाद्वल— Sward, green.
इन्द्रगोपक— A chameleon. (सरडा)
काश् with प्र— (10th conj.) To reveal, disclose.
कृ with लघु— To deprecate, derogate, think light of.
„ पुरस्— To give precedence, preference. पुरस्कार. Precedence, preference. As

'सोऽस्मिन्कर्मणि पुरस्कारमर्हति or पुरस्कर्तुं युज्यते.'

„ आकुली— To trouble, harass.
गति— Remedy, procedure. As

'का गतिः.'

अवहित— Attentive. From धा with अव. As

'संगीतशालाभ्यन्तरेऽवधानं देहि '— *Sʹâkuntala V.*

भू with व्यक्ती— To appear, become manifest.
„ परि— To assail, attack. As

'एते दुष्टमधुकराः परिभविष्यन्ति.'

„ कलुषी— (Said of the mind.) To become troubled, confused, to entertain suspicions &c.
आभिजात्यम्, अभिजनः— High, noble birth.

मेऽस्मिन्नेव प्रदेशे दिवसमतिवाहयितुम्" इति । ततश्च चन्द्रमणि-शिलायामुपविश्य गिरितटात्सुहृदाहृतपञ्चजातीयवर्णकान्गृहीत्वा शिलायां प्रियतमामालिलेख । नायकस्य भावपरीक्षणाय सह चेट्या मलयवती निभृता तत्रैवातिष्ठत् ।

ततो युवराजमित्रावसुः "वत्स, कुमारजीमूतवाहनोऽस्माभिरिहा-सन्नतरः परीक्षितः कृतो योग्यो वरः । तदस्मै वत्सा मलयवती प्रीति-पाद्यताम्" इति पित्राज्ञप्तस्तमेवान्विष्यंश्चन्दनलतागृहमागत्य जीमूत-वाहनं प्रणनाम । परस्परकुशलप्रश्नानन्तरं तातादेशेनागतमात्मानं निवेदयामास मित्रावसुः । ततो जीमूतवाहनेनानुयुक्तो मित्रावसुर्भू-योऽपि तातसंदेशं न्यवेदयत्– "अस्ति मे दुहिता मलयवती नाम जीवितमिवास्य सर्वस्यापि सिद्धराजान्वयस्य । सा मया तुभ्यं प्रदत्तेति । तदियं प्रतिगृह्यताम्" इति । श्रुत्वैतं संदेशं संकट इव पतितो नायको मित्रावसुमाह– "मित्रावसो, क इव नेच्छति भव-द्भिः सह श्लाघ्यमीदृशं संबन्धम् । किंतु न शक्यते चित्तमन्यतः प्र-वर्तयितुम् । अतो नाहमेनां प्रतिग्रहीतुमुत्सहे" इति । एतच्छ्रवणस-मकालमेव निभृतं शृण्वती मलयवती "स न मय्यनुरक्तोऽन्यसंक्रान्त-हृदयः" इति शङ्किता मूर्च्छामवाप । ततो नायकसखो मित्रावसुमाह– "भोः, पराधीन एषः । किमेतेनानुनीतेन । गुरुजनमस्य गत्वाभ्यर्थय" इति । मित्रावसुरपि "साधूक्तमनेन । नायं गुरुवचनमतिक्रामति"

---

1. A paint. 2. Mind. 3. Should be given. 4. Asked, inquired. 5. Pressing, wining, persuading.

इति गत्वास्य पित्रोर्मलयवतीं प्रतिपादयामीति निश्चित्य निष्क्रान्तः । नायिका हृदयेप्सितो वरो नैव लभ्य इति निष्प्रयोजनं जीवितं हातुकामाशोकपादपेऽतिमुक्तलतापाशेनात्मानमुद्बध्य व्यापादयिष्यामीति संप्रधार्य "मित्रावसुर्दूरं गतो न वेति दृष्ट्वागच्छ" इति चेटीमगमयत् । अपसृतायां तस्यां दिशो विलोक्य पाशं पाणौ गृहीत्वा " भगवति गौरि, यदि त्वयेह जन्मनि मे न कृतः प्रसादस्तदन्यस्मिन्नपि जन्मान्तरे यथा नेदृशी दुःखभागिनी भवामि तथा कुरु " इति भगवतीमामन्त्र्य कण्ठे पाशमार्पयत् । चेटी तु किं सा प्रतिपद्यत इति तत्रैव स्थिता ससंभ्रमम् "परित्रायध्वं परित्रायध्वम्"इत्याचक्रन्द । नायकः ससंभ्रममुपेत्य स्वमनोरथभूमिं तथा साँहसव्याप्टतां दृष्ट्वा पाणौ गृहीत्वा लतापाशमाक्षिपत् । नायकमित्रेण मरणव्यवसायकारणं पृष्टा नायिकासखी "नायक एव तत्" इति कथयामास । ततश्चन्दनलतागृहं प्रविश्य शिलातले या हृदयवल्लभा पूर्वं नायकेनालिखिता सान्यैवेति सेर्ष्यया आत्मसादृश्यदर्शनेन यदा प्रत्ययो जातस्तदा चित्रगतमात्मानं दर्शयता तेन दुर्जनीकृतास्मीति तस्या अभात् । अत्रान्तरे "भर्तुर्जीमूतवाहनस्य गुरुभिस्त्वं प्रतीष्टा"इति कथयित्वा चेट्याह—"भर्तृदारिके, आज्ञप्तं हि युवराजमित्रावसुना यथाद्यैव मलयवत्या विवाहोत्सवस्य मङ्गलं संवृत्तं भविष्यति । तल्लघु तां गृहीत्वागच्छ"इति । तच्छ्रुत्वा सानुरागं नायकं पश्यन्ती सपरिवारा निश्चक्राम मलयवती । नायकोऽपि स्नानवेलां

1. Desirous of leaving. 2. Determining upon. 3. Noose. 4. Engaged in rash act.

ज्ञात्वा तातवन्दनाय स्नानभूमिमगच्छत् । ततः प्रथमप्रदोषे मलयवत्या विवाहमङ्गलं संवृत्तम् । विवाहमङ्गलानन्तरं मलयवतीमात्राज्ञया जामात्रर्थं संविशेषसज्जीकृततमालवीथिकं कुसुमाकरोद्यानं विभवतः परिवारेण विवाहवेषालंकृतो नायको जगाम। तत्रोद्यानस्य रमणीयतां पश्यन्कार्यमिषेण गतेषु परिजनेषु नायिकया सहैकान्ते यावत्तिष्ठति तावन्मित्रावसुस्तं द्रष्टुमागतः । प्रवेशकाले संरब्धं मित्रावसुं दृष्ट्वा पृष्टः सः "भवदीयं राज्यं मतङ्गहतकेन समाक्रान्तम्" इत्यप्रियं निवेदयामास । सोऽपि तन्न गणयामास ।

कालेन युवराजमित्रावसुना सह समुद्रवेलां द्रष्टुं गतेन जीमूतवाहनेन मलयाचलसानुतुल्यान्नागास्थिसंघातान्दृष्ट्वा मित्रावसुः पृष्टः— "किंनिमित्तमिमे संघातमृत्यवः" इति । मित्रावसुस्तं प्रत्यब्रवीत्—"कुमार, नैवामी संघातमृत्यवः । श्रूयतां यथैतत् । पुरा किल स्वपक्षपवनापास्तसमस्तसागरजलस्तरसा रसातलादुद्धृत्योद्धृत्य भुजङ्गाननुदिनं समाहारयति स्म वैनतेयः । ततः सकलनागलोकविनाशशङ्किना नागराजेन वासुकिना गरुत्मानभिहितः— "गरुत्मन्, त्वदभिपातसंत्रासात्सहस्रशः स्रवन्ति भुजङ्गमाङ्गनानां गर्भाः । शिशवश्च पञ्चत्वमुपयान्ति । एवं संततिविच्छेदादस्माकं भवतश्च

1. Excellent, having something विशेष in it. 2. Rich, wealthy. 3. Retinue, dependants. 4. Incensed, angry. 5. Seized. 6. Shore. 7. Speedily. 8. From the bottom of the earth i. e. from Pâtâla, the abode of snakes. 9. The son of Vinatâ i. e. Garuda. 10. The king of serpents. 11. The bird (Garuda). 12. Flying downwards, descent. 13. Go to the state of five i. e. die.

स्वार्थहानिः । तद्यदर्थमभिपतति पातालं भवांस्तदेकैकमनुदिनमहं समुद्रतटस्थितस्य ते प्रेषयामि" इति । प्रतिपन्नं[1] तत्सर्वं पक्षिराजेन । नागराजेन पन्नगा एवं रक्षिताः" इति । तत्र स्थितयोस्तयोः प्रतीहार आगत्य मित्रावसुम्—"कुमार, तातस्त्वामाह्वयति" इत्यकथयत्कर्णे । मित्रावसुः "कुमारेणापि बहुप्रत्यवायेऽस्मिन्प्रदेशे कुतूहलिना न चिरं स्थातव्यम्" इति कुमारमभ्यर्थ्य तद्विसृष्टो गृहं जगाम ।

अथ गिरिशिखरादवतीर्य समुद्रतटमवलोकयितुं यावत्स समारभते तावत् "हा पुत्र शङ्खचूड, कथं व्यापाद्यमानः किल मयाद्य त्वं प्रेक्षितव्यः" इति योषित इवार्तप्रलापं[2] समाकर्ण्य तदनुसारेण गत्वा "केयम् । कुतो वास्याः प्रतिभयमिति स्फुटीकरोमि[3]" इति निराचिनोत् । तावता वृद्धयानुगम्यमानः कश्चित्पुरुषः कोऽपि किंकरो गोपायितवस्त्रयुगश्च दृशोर्विषयीभूतः[4] । ततो वृद्धायास्तारररोदनाद्विक्लवतया च तस्य पुरुषस्य तत्समाश्वासनेन च जीमूतवाहनः "सा वृद्धा तस्य पुरुषस्य माता तदर्थं साक्रन्दति[5]" इति जज्ञौ । परंतु समन्तादवलोक्यापि न किंचिद्भयकारणमिति यदापश्यत्तदोपसृत्य पृच्छामीति तस्य मनस्यायातम् । ततः प्रसक्तादेवालापात्तद्व्यक्तीभविष्यतीति विटपान्तरित एवाशृणोत्।स किंकरः कृताञ्जलिः संस्तं पुरुषमुद्दिश्याह— "कुमार शङ्खचूड, एष स्वामिन आदेश इति कृत्वेदृशं निष्ठुरं मन्त्र्यते । नागलोकस्वामी वासुकिस्त्वामाज्ञापयति, एतद्रक्तांशुकयुगुलं परिधायारोह वध्यशिलाम् । येन

1. Assented to, accepted. 2. Afflicted speech. 3. To make manifest. 4. Became the object of sight, was seen. 5. Loudly.

एताश्च चन्दनाश्वकर्णकेसरपाटलाप्रायतरुगहनाः परिणतमालूरसुरभयोऽरण्यगिरिभूमयः स्मारयन्ति खलु तरुणकदम्बजम्बूवनावनद्धान्धकारगुरुनिकुञ्जगम्भीरगह्वरोद्दारगोदावरीमुखरितस्निग्धविशालमेखलाभुवो दक्षिणारण्यभूधरान्। अयं च मधुमतीसिन्धुसंभेदपावनो भगवान्भवानीपतिरपौरुषेयप्रतिष्ठः सुवर्णबिन्दुरित्याख्यायते। (प्रणम्य।)

जय देव भुवनभावन जय भगवन्निखिलनिगमनिधे।
जय रुचिरचन्द्रशेखर जय मदनान्तक जयादिगुरो॥

(गमनमभिनीय।)

अयमभिनवमेघश्यामलोत्तुङ्गसानु-
मदमुखरमयूरीमुक्तसंसक्तकेकः।
शकुनिशबलनीडानोकहस्निग्धवर्ष्मा
वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः॥

अपि च।

दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि।

---

1. A tree. 2. Ripe. 3. A fruit (बिल्व). 4. A tree. 5. Tied, fastened. 6. Caves. 7. Echo. 8. Resounding. 9. The edge of a mountain. 10. Rivers so called. 11. Confluence. 12. That which gives sanctity. 13. Not effected by any man or mortal. 14. Establishment. 15. Producer, creator. 16. Vedas. 17. Delight. 18. Given out, uttered. 19. Attached to, intent on. 20. Variegated. 21. Trees on which there were nests of birds. 22. Body, form, surface. 23. Gives. 24. Stones, rocks. 25. Caves. 26. Echo. 27. Bigness. स्त्यानं दधति–Swell. 28. Foaming and making noise.

शिशिरकटुकषायः स्त्यायते सल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥
(ऊर्ध्वमवलोक्य।) कथं मध्याह्नः। तथा ह्यत्र संप्रति
काश्मर्याः कृतमालमुद्गतदलं कोर्यष्टिकष्टीकते
तीराश्मन्तकशिम्बिचुम्बिनमुखा धावन्त्यपः पूर्णिकाः।
दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितं
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुटाः ॥
तद्भवतु। माधवमकरन्दावन्विष्य यथाप्रस्तुतं साधयामि। (इति निष्क्रान्ता।)

BHAVABHÛTI—*Mâlatîmâdhava.* Act IX.

---

8. Love-smitten Damayantî.

अथ नलस्य गुणं गुणमात्मभूः सुरभि तस्य यशः कुसुमं धनुः।
श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय ताम् ॥

1. Astringent. 2. Spreads, is scattered, increases. 3. A tree (सालई). 4. Elephant. 5. Torn, cut. 6. Motionless. 7. A tree (शिवणी). 8. A bird (कोंढा). 9. Goes. 10. A tree. 11. Pod, branch. 12. A bird. 13. A bird (जलकाक). 14. A tree (तिवस). 15. Hollow (of a tree). 16. Trunk. स्कन्ध is well defined by Amarasinha: 'अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः'. That part of a tree which is between the root and the part whence branches ramify. 17. Creeper. 18. Qualification. 19. Bow-string. 20. God of Love. 21. The words गुणं, धनुः, इषुं stand in the place of objects of विधाय. 22. That has reached (her) ears, heard; also drawn to the ear. 23. There is a double-entendre intended on this word. Good mind, and flower. 24. Him. (Nala).

यदेतनुज्वरभाक्तनुते स्म सा प्रियेकथासरसीरसमज्जनम् ।
सपदि तस्य चिरान्तरतापिनी पॅरिणतिर्विषमा समपद्यत ॥
ध्रुवमधीतवतीयमधीरतां दयितदूतपतद्रातिवेगतः ।
स्थितिविरोधकरीं द्व्यणुकोदरी तदुदितः स हि यो यदनन्तरः ॥
अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।
अजनि पङ्गुरपाङ्गनिजाङ्गनभ्रमिकणेऽपि तदीक्षणखञ्जनः ॥

---

1. Strong, intense fever; also fever brought on by Love. 2. Talk and conversation about her lover. 3. Lake, tank. 4. Heating, troubling the mind. 5. Consequence, परिणामः. 6. Serious, dangerous. 7. 'अधीतवती + इयम्'. 8. Disinclination to remain in one place, unsteadiness. 9. From the velocity of the bird, the messenger of her dear lover (the swan). 10. That disturbed, threw into confusion. The word स्थिति is used in the sense of remaining in one place, and sense of modesty. 11. Whose belly, abdomen or rather waist is as slender as a द्व्यणुक. This refers to the theory of certain philosophers who held that the world is made up of particles, atoms called अणु or अणुक. Two such forming what they called द्व्यणुक. Three such forming त्र्यणुक and so on. द्व्यणुक therefore is the smallest cluster of atoms possible. 12. This is a न्याय. That thing may be said to have been formed out of that immediately after which a particular thing came to pass or into existence. Here upto the time she had not seen and talked to the swan, she was धीर; she became अधीर or learned, as it were, अधीरता from the swan, because immediately after it left her she became अधीर. 13. To the highest degree. 14. Bacame. 15. Silly. 16. Her face became too silly to remember even a smile, she forgot her smiles, smile left her face. 17. Lame, unable. 18. In the slight motion through along the courtyard of the corners. 19. The eye compared to a bird called खञ्जन. The eye was motionless.

वशिरालौ चाङ्घ्री, जङ्घे चानुपूर्ववृत्ते, पीवरोरुग्रस्ते इव दुरुपलक्ष्ये जानुनी, सकृद्विभक्तश्चतुरस्रः ककुन्दरविभागशोभी रथाङ्गाकार-संस्थितश्च नितम्बभागः, तनुतरमीषन्निम्नं गम्भीरं नाभिमण्डलं, वलित्रयेण चालंकृतमुदरम्, उरोभागव्यापिनावुन्मग्नचूचुकौ विशालारम्भशोभिनौ पयोधरौ, धनधान्यपुत्रभूयस्त्वचिह्नलेखालाञ्छिततले स्निग्धोदरकोमलनखमणी ऋज्वनुपूर्ववृत्ताताम्राङ्गुली संनतांसदेशे सौकुमार्यवत्यौ निमग्नपर्वसंधी च बाहुलते, तन्वी कम्बुवृत्तबन्धुरा च कन्धरा, वृत्तमध्यविभक्तरागाधरम्, अंसक्षिप्तचारुचिबुकम्, आपूर्णकठिनगण्डमण्डलम्, संगतानुवक्रनीलस्निग्धभ्रूलतम्, अनतिप्रौढतिलकुसुमसदृशनासिकम्, अत्यसितधवलरक्तत्रिभागभासुरमधुराधीरसंचारमन्थरायतेक्षणम्, इन्दुशकलसुन्दरललाटम्, इन्द्रनीलशिलाकाररम्यालकपङ्क्ति,द्विगुणकुण्डलितम्लाननालीकनाललालितलम्बश्रवणपाशयुगलमाननकमलम्, अनतिभङ्गुरो बहुलः पर्यन्तेऽप्यकपिलरुचिरायामवानेकैकनिसर्गसमस्निग्धनीलो गन्धग्राही च मूर्धजकलापः। सेयमाकृतिर्न व्यभिचरति शीलम्। आसज्जति च मे हृदयमस्यामेव। तत्परीक्ष्यैनामुद्वहेयम्। अविमृश्यकारिणां हि नियतमनेकाः पतन्त्यनुशयपरंपराः" इति स्निग्धदृष्टिराचष्ट—"भद्रे, कच्चिदस्ति कौशलं शालिप्रस्थेनानेन संपन्न-

1. Regularly round. 2. Fat. 3. The cavities of the loins. 4. A wheel. 5. Nipples. 6. Plenty, abundance. 7. Thick, luxuriant. 8. Such a good form (exterior) will not present an inferior mind, disposition not corresponding (to this nice exterior). 9. Repentance, grief. 10. Succession, series.

4. The *Raghuvams'a* of Kâlidâsa with the commentary (the Sanjîvinî) of Mallinâtha and various readings. Rs. 2.

5. The *Subhâshitaratnabhâṇḍâgâra* or the Gems of Sanskrit Poetry, being a collection (of about 12,000 s'lokas) of Witty, Epigrammatic, Instructive and Descriptive verses picked up from about 500 different authors. Rs. 3 Ans. 8.

6. The *Hitopades'a* of Vishṇus'arman. Ans. 9.

7. The *Ratnâvalî* of S'rîharshadeva with explanatory English Notes. Ans. 8.

8. The *Das'akumâracharita* of Daṇdin with its Pûrvapîṭhikâ and Uttarapîṭhikâ and an Uttarapîṭhikâ by Padmanâbha ; also with the commentaries (the Padachandrikâ) of Kavîndra Sarasvatî and (the Bhûshaṇâ) of S'ivarâma on the Das'akumâracharita and the Padadîpikâ on the Pûrvapîṭhikâ and various readings. Rs. 2.

9. The *Abhijnânas'âkuntala* of Kâlidâsa with the commentary (the Arthadyotanikâ) of Râghavabhatta and explanatory English Notes. Rs. 2.

10. The *Bhagavadgîtâ* (in very small type). Ans. 5.
11. The *Pancharatnî Gîtâ* („). Ans. 7.
12. The *Adhyâtmarâmâyaṇa* („). Re. 1 Ans. 4.
13. The *Saptas'atî* („). Ans. 5.
14. The *Anubhûtiprakâs'a* of Vidyâraṇyasvâmin. Rs. 2 Ans. 4.
15. The *Râmachandrikâ* (Declensions of nouns). Ans 4.
16. The *S'ivatâṇdava-Stotra.* Ana. 1.
17. The *Ratnasamuchchaya* (about 900 sayings of different authors). Ans. 2.
18. The *Pras'nottara-Payonidhi.* Ans. 4.
19. The *Ashtâdhyâyî-Sûtrapâtha* of Pâṇini. Ans. 5.
20. The *Udâsînasâdhu-Stotra.* Ans. 5.
21. *Æsop's Fables* (Translated). Part 1 & 2. Each part. Ans. 6.
22. The *Abhinavakâdambarî* by Dhuṇdirâja (An abstract of Bâṇa's Kâdambarî). Ans. 8.
23. The *Manusmṛiti* with the commentary of Kulluka-bhatta. Rs. 2. Ans. 8.
24. The *Dharmasindhu* (with Marâthî translation). Rs. 6.
25. The *S'ûdrakamalâkara* („). Rs. 4.
26. The *Matriculation Examination Papers* in Sanskrit with answers (1862–1883). Re. 1 Ans. 2.

THE SANSKRIT READER.

OBJECT.

The Study of Sanskrit has been greatly facilitated by the introduction of the two books of Prof. R. G. Bhâṇdârkar. But the main object in preparing those excellent books was, we think, to simplify the intricacies of grammar and present the subject in an easily intelligible form. They, therefore, contain rather too much of Grammar and too little of Reading. Sanskrit forms an important part of the studies taught at the High Schools and Colleges and the majority of students who present themselves at the University Examinations select Sanskrit as their Second Language. But though Sanskrit has been so largely studied, it is not uncommon to find that students who are very clever at making by heart a string of grammatical forms, however recondite and difficult, are hardly able to construe a simple sentence and speak in a way in which ordinary people spoke Sanskrit when it was a living language. In fact they have no command over the language. The reason is not far to seek. The standard works—the Kâvyas and the Nâtakas—are high for beginners and cannot be much utilized without the help of a teacher—a procedure not within the reach of many students. This attempt has, therefore, been made to meet the desiderata of a good Reading Book which the students can read and understand by themselves.

RATES OF SUBSCRIPTION.

	Rs.	Ans.
Per Annum (in advance)...	0—	12.
„ „ (in arrears).	1—	0.
Single Copy.	0—	2.
Postage for Mofussilites.	0—	6.

Intending subscribers should send their names and subscriptions to the Proprietor of the Nirṇaya-sâgara Press, Bombay.

THE
SANSKRIT READER.

संस्कृतपाठावलिः ।

Vol I. February 1884. No 2.

CONTENTS.

		Page.
Part I.	EXERCISES.	
Section 1.	Exercise 2.	3
,, **2.**	,, 2.	3
,, **3.**	,, 2.	3
Part II.	CHOICE EXPRESSIONS, IDIOMS &c....	3
Part III.	TALES FROM SANSKRIT AUTHORS.	
1.	S'rîharsha's Ratnâvalî.	5
Part IV.	ELEGANT EXTRACTS.	
2.	A Moon-light Night....	5
3.	Aja's Lamentation.	5

BOMBAY:

Printed and Published by the Proprietor
of the "Nirṇaya-sâgara" Press.



